IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# व्याकरणवेदान्तमतयोः शब्दविमर्शः

**अनुजः , शोधछात्रः , संस्कृत विभागः, गुजरात विश्वविद्यालयः**

मानवीय व्यवहारस्य आधारः शब्दः एव। नामरूपात्मके जगति सर्वो व्यवहारः शब्देनैव भवति। अमुमभिलक्ष्यैव प्राचीनकालादेव भारतीयमनीषिणः शब्दविमर्शे संलग्नाः सन्ति। शब्दस्य उत्पत्तिः तेन अर्थावबोधः तयोर्मध्ये सम्बन्धः, इत्येतेषु तथ्येषु वैदिक साहित्ये, न्यायवैशेषिकयोगमीमांसावेदान्तबौद्धदार्शनिकनिकाये चर्चा चर्च्यते। परं शब्दस्य अर्थस्य तयोश्च सम्बन्धस्य यादृशी चर्चा पदशास्त्रस्य दर्शनग्रन्थेषु वर्तते न चान्यत्र दृश्यते। शब्दः नित्यः उत वा अनित्यः, कार्यः उत वा अभिव्यङ्ग्यः इति विषयाः सन्ति। येषां विषये चर्चा समुपलब्धाः भवति। तेषु च वेदान्तिनां वैयाकरणानाम् अभिमतमभिलक्ष्यीकृत्य एषा चर्चा क्रियते।

**आचार्यभर्तृहरेः शब्दाद्वैतमाचार्यशङ्करस्य ब्रह्माद्वैतम्**

आत्मब्रह्मैक्यं प्रतिपादनस्य प्रसङ्गे पूर्वपक्षे केनोपनिषदि उपास्यस्य तथा उपासकस्यान्तरं निरूपणं कुर्वन् उच्यतेयत् आत्मा (जीव)ए कर्मए उपासनादिभिः साधनैः ब्रह्मणः (परमात्मनः) प्राप्तिं कर्तुमिच्छति। अतः उपासकाद् भिन्नं द्वितीयम् उपास्यं (ब्रह्मए विष्णुःए इन्द्रादिः) भवेत्। तार्किकोऽपि जीवात्मनः ज्ञानेन परमात्मनः प्राप्तिं मन्यते। मीमांसकाः ‘अमुं यजष ‘अमुं यजऽ कथयन्तः याजकाद् भिन्नम् आराध्यं स्वीक्रियन्ते। अतः यः उपास्योऽस्ति सः ब्रह्मए तस्माद् भिन्नः उपासकोऽस्ति। तदा उभयोरैक्यं कथं भविष्यति अस्मिन् सन्देहे सिद्धान्तः विज्ञापितोऽस्ति –

**यद् वाचानभ्युदितं येन वागभ्युद्यते।**

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।।**[१]

अस्यार्थोऽयम् - यद् चैतन्यमात्रं स्वरूपं क्रमरहितं शब्दतत्त्वमस्ति तथा वर्णपदवाक्यरूपी क्रमवतीवाण्या (वैखरी) न कथयितुं शक्यतेए तद् ब्रह्म वर्त्तते।

[१] केनोपनिषद् – १/४

कठोपनिषदि ब्रह्मजिज्ञासुं नचिकेतसं ब्रह्मणः उपदेशं कुर्वता यमराजेनोक्तम् –

**सर्वे वेदाः यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।**

**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओमित्येतत्॥**[1]

**'ओमित्येकाक्षरं ब्रह्म'**[2], **'तदेतदक्षरं ब्रह्म'**[3], **'ओमित्येकाक्षरमिदं सर्वं तस्योपाख्यानम्'**[4] इत्यादिषु श्रुतिषु अक्षरम् (शब्द)ब्रह्म मतम्। अन्यत्र शब्दब्रह्मज्ञानं परब्रह्मज्ञानस्य साधनमपि मतमस्ति –

**द्वे विद्ये वेदितव्ये शब्दब्रह्म परं च यत्।**

**शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।।**[5]

महावैयाकरणभर्तृहरिणा शब्दतत्त्वं ब्रह्म मत्वा तदपि आद्यन्तरहितम् अक्षरयुक्तं तथा चाखिलं प्रपञ्चं तस्य विवर्त्तः (अविद्यायाः कारणमन्यथा घटपटादिरूपेणाभासः) विज्ञापितः अस्ति।[6] अग्रे तेनैव स्वोपज्ञटीकायां लिखितमस्ति –

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्ति निबन्धनम्।**

**विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते॥**[7]

इदं जगत् शब्दरूपं वर्त्तते। शब्दस्य शक्तिरेव अस्य परिचायिका वर्त्तते। अनेन समस्तं विश्वमयथार्थस्य प्रवृत्तिनिवृत्याः विभागः शब्देनैव क्रियते। इदं स्पष्टंवर्त्तते यत् अर्थस्य स्थितिः, प्रवृत्ति-निवृत्यामेव भवति। यदि इदं ब्रह्म शब्दात्मकं न भवेच्चेत् शब्देन अस्य बोधः न भवेत् तथा इदं जगत् शब्दरूपब्रह्मणः मात्रासु (शक्तिषु) अभिव्यक्तमभूत् अन्यत् प्रलयस्यावसरे स्वोपादानकारणीभूतासु तासु शक्तिषु विलीनं भवति।

**'वागेव विश्वा भुवनानि जज्ञे', 'वागेवेदं बुभुजे'**[8] इति श्रुत्याइदं प्रकटीभूतं भवति यत् विश्वस्य उत्पादिका, पालिका तथा संहारकर्त्री शक्तिः वाग् (वाणी) वर्त्तते। एवं विधिः**'यतो वा इमानि भूतानि जायन्ते', येन जातानि जीवन्ति, यं प्रत्यभिसंविशन्ति'**[9]श्रुतिः ब्रह्मणः जगत्कर्तृत्वं पालकत्वं तथा संहारकारकत्वं प्रतिपादयति। एते उभेश्रुती मेलयित्वा अवगमनवाचो ब्रह्मणश्चैक्यं सिद्धं भवति। सर्वदर्शनसङ्ग्रहे स्वामिशङ्करचैतन्यभारतिना अस्य समर्थनं कृतमस्ति। मन्त्रनित्यत्वपरकाणि सर्वाणि प्रमाणानिशब्दब्रह्मणः समर्थकानि सन्ति। मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशत्यां देव्यपि 'शब्दात्मिका' उक्ता अस्ति।[10]

---

१ कठोपनिषद् – १/२/१५

२ ब्रह्मविद्योपनिषद्

३ मुण्डकोपनिषद् – २/२/२

४ माण्डूक्य - १

५ ब्रह्मविन्दूपनिषद्

६ वाक्यपदीयम् – १/१

७ तदेव – १/१ स्वोपज्ञवृत्ति

८ मैत्रायणी उपनिषद् – प्र. – ६, क. - २२

९ तैत्तिरीयोपनिषद् – ३/१/१

१० दुर्गासप्तशती – ४/१०

शब्दानुशासनस्य प्रयोजनानि विज्ञापयता महाभाष्यकारेण पतञ्जलिना ऋग्वेदस्य एकः मन्त्रः उद्धृतः –

**चत्वारि शृंगाः त्रयो अस्य पादाद्वे शीर्षे सप्त हस्तासो अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश॥**[1]

अस्यार्थः वर्त्तते शब्दशास्त्रं प्रतिपाद्यो वृषभाकारः शब्दस्वरूपो महान्देवः (ब्रह्म) मरणशीलमनुष्याणाम् अन्तःकरणे प्रविष्टो वर्त्तते। अस्य नामाख्यातोपसर्गनिपातरूपिणी चत्वारि शृङ्गाणि सन्तिए भूत्, भविष्यत्, वर्त्तमान एते त्रयः काला एव त्रयः पादास्सन्ति। द्वे (नित्यः कार्यश्च) शीर्षे स्तः तथा प्रथमाद्वितीयादिसप्तविभक्तयः एव सप्त हस्ताः सन्ति। उरसि कण्ठे शिरसि बद्धः एषः शब्दरूपी महान्देवः निरन्तरं शब्दं करोति। एवंमहान्देवो सायुज्यं प्राप्तुं व्याकरणस्य अध्ययनं कुर्यात्।

कैय्यटेन ष्महतादेवेनष् भाष्यस्य ष्परेण ब्रह्मणाष् अर्थः कृतः।[2] सूतसंहितायां कथितमस्ति यत् ब्राह्मणः रूपद्वयं वर्त्तते– परं तथा शब्दः। उभावपि प्रणवस्वरूपौ स्तः। परब्रह्मसच्चिदानन्दस्वरूपं स्वभावतः प्रकृष्टमस्ति। शब्दब्रह्म सुनिर्मलं प्रणवरूपं वर्त्ततेए यतो हि प्रकृष्टोऽनवत्वस्य हेतुः वर्त्तते। अत्र अपरं ब्रह्म उच्यते –

**परः परतरं ब्रह्म ज्ञानानन्दादि लक्षणम्।**

**प्रकर्षेण नवं यस्मात् परं ब्रह्म स्वभावतः।।**

**अपरः प्रणवः साक्षात् शब्दरूपः सुनिर्मलः।**

**प्रकर्षेण नवत्वस्य हेतुत्वात् प्रणवः स्मृतः॥**[3]

**वेदान्तमते शब्दार्थसम्बन्धः**

वेदान्तिनः मीमासंकाश्च शब्दं नित्यं विभुञ्च मन्यन्ते। सार्धमेव एते पदवाक्यमनित्यं मन्यन्ते। अर्थबोधाय मीमांसकाः पूर्वपूर्ववर्णसंस्कारसहितम् अन्तिमं वर्णं अर्थस्य बोधकं मन्यन्ते तथा च वेदान्तिनः क्रमविशिष्टम्ए एकबुद्ध्यारूढ़वर्णान् एव वाचकान् कथयन्ति।

मीमांसकाचार्यजैमिन्या श**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः**श[4] सूत्रेण शब्दार्थसम्बन्ध औत्पत्तिकः मतः। शब्देन सार्धम् अर्थः नियमतः युज्यते। श्लोकवार्त्तिककारेणापि शब्दनित्यत्वस्य स्थापनां कुर्वता उक्तमस्ति –

श**तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति।**श[5]

---

[1] ऋग्वेद – ४/५८/३, महाभाष्यम्, पस्पशाह्निकम्

[2] महाभाष्यपस्पाह्निकम्, प्रदीपम्

[3] व्याकरणदर्शन, भूमिका (शब्दब्रह्मैक्यप्रतिपादनप्रसङ्गे)

[4] मीमांसासूत्रम् – १/१५

[5] श्लोकवार्त्तिकम् - ३६६

अद्वैतवेदान्तस्य संस्थापकादिशङ्कराचार्येण **श्शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्श्**[1] सूत्रस्य भाष्ये उक्तं यत् वर्णनित्यत्वमस्ति तद् उच्चरितप्रध्वंसि कथितुं न शक्यते। यतो हि सोऽयं गकारः इदं प्रतीयते। एषा प्रतीतिः जातिविषयका न कथयितुं शक्यते यतो हि गौः उच्चारणेन गौ इत्यस्यैव प्रतीतिः भवति जात्याः न। मीमांसका अपि वर्णव्यक्तिमेव मन्यन्ते न तु जातिम्।

**शब्दब्रह्मनिरूपणम्**

शब्दधातुः चुरादिगणे पठितोऽस्तिए उपसर्गपूर्वकं तथा उपसर्गरहितम्। अस्य धातोः आविष्कारंए भाषणञ्च अर्थद्वयमस्तिए अस्य द्वे व्युत्पत्ती स्तः–

१ण शब्द्यते - आविष्क्रियतेऽर्थः अनेन, करणार्थकल्युटं प्रत्ययं बाधित्वा घञ्प्रत्ययस्य करणेनास्यार्थः भविष्यति -अर्थस्य प्रकाशकः।

२ण शब्द्यते - ध्वनिना अभिव्यज्यते,अनेन विग्रहेण कर्मणि अर्थे घञ् प्रत्ययमनात् अस्यार्थः - ध्वनिभिः अभिव्यक्तमर्थरूपं वाक्तत्त्वं भविष्यति।

दार्शनिकैः एकः तृतीयोऽपि अर्थः निःसारितः – शब्द्यते-अभिव्यज्यते ब्रह्म येन सः परब्रह्मादिप्रतिपादकं प्रणवम्।

महाभाष्यकारेण शब्दस्य परिभाषा द्वाभ्यां प्रकाराभ्यां कृता अस्ति –

**येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।** [2] अर्थस्य बोधं कारयितुमुच्चरिताः भवन्ति। व्यवहारविषयभूत्वात् अभिन्नशब्दे समाजदेशानुसारं तथा च कालानुसारं बाह्यपरिवर्तनानि अपि भवन्ति। यथाभर्तृहरेः मतमस्ति –

परम्पराया यदा वक्तुः वदनशक्त्याः ह्रासो भवितुं लगति तु संस्कृतशब्दानाम् अपभ्रंशनम् आरम्भो भवति। यथा घटेन घटः, गृहेण गृहम्, पित्रा पिता, जनकादि अपभ्रंशनिर्मिताः शब्दाः दृश्यन्ते। परन्तु अर्थबोधे किञ्चिदप्यन्तरं नायाति। योऽर्थः घटस्य वर्तते स एव घटस्य। अस्मिन्नपि सिद्धः भवतियत् व्यावहारिकदशायां शब्दस्य केवलं बाह्याकृत्यां परिवर्तनमथवा परिवर्धनं भवतिए आन्तर्नित्यार्थेन अभिन्नशब्दस्तु एक एव वर्तते।

**आचार्यभर्तृहरेः शब्दाद्वैतम्**

अयं च स्फोटो महाभाष्यकारेण भगवता पतञ्जलिनाकण्ठरवेणोपवर्णितः–

**श्एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम्ध् भेर्याघातवत्। तद्यथा भेर्याघातो भेरीमाहत्य कश्चित् विंशतिपदानि गच्छति। कश्चित् त्रिंशत्। कश्चित् चत्वारिंशत्। स्फोटश्च तावानेव भवति। ध्वनिकृता वृद्धिः।श्**

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**

**अल्पो महांश्च केषाञ्चित् उभयं तत्स्वभावतः॥**[3]

---

[1] वेदान्तसूत्रम् - २८

[2] महाभाष्यपस्पशाह्निकम्

[3] महाभाष्यम् – १/१/७०

अत्र स्फोटपदेन व्यक्तिस्फोटो विवक्षित इति कैय्यटः। तथान्यत्र च प्रत्याहाराह्निके चतुर्थसूत्रे -

**॥अथ वा उभयतः स्फोटमात्रं निर्दिश्यतेए रश्रुतेर्लश्रुतिर्भवतीति॥**[1]

अत्र जातिस्फोटो विवक्षित इति कैय्यटः।

नागेशस्तु स्फोटवादमिमं स्फोटायनमुन्युपज्ञमाचख्यौ स्फोटवादान्ते–

**वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।**

**परिष्कृत्योक्तवांस्तेन प्रीयतां परमेश्वरः।।**[2]

**स्फोटस्य प्रणवब्रह्मरूपता**

अयं च स्फोटः सर्ववागर्थप्रपञ्चोपादानभूतप्रणवरूपःए यः किलेत्थमाम्नायते ॥ओंकार एव सर्वा वाक्। सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति॥ इति। बह्वी = पदवाक्यरूपा। नानारूपा = घटपटादिरूपा चेत्यर्थः।

अयमेव स्फोटो वाक्यपदीये भर्तृहरिणावर्णितः–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[3]

तथा आन्तरस्फोटात् बाह्यस्फोटस्योदयोऽन्यत्र पठ्यते। प्रथममान्तरस्फोटमाह–

**समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।**

**हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते॥**[4]

यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधात् अस्माभिरपि श्रूयते स इत्यर्थः।

**ततोऽभूत् त्रिवृदोंकारः योऽव्यक्तप्रभवः स्वराट्।**

**यत्तल्लिङ्गं भगवतः ब्रह्मणः परमात्मनः॥**

**शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्।**

**येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥**

**स्वधाम्नो ब्रह्मणः साक्षात् वाचकः परमात्मनः।**

**स सर्वबीजमन्त्रोपनिषद्बीजं सनातनम्॥**[5]

---

[1] तदेव – १/१/२/३, भाग – १, पृ. - १२०

[2] स्फोटवादः

[3] वाक्यपदीयम् – १/१

[4] भागवतम् – १२/६/३७

[5] श्रीमद्भागवतम् – १२/६/३९-४१

**'वागेव विश्वा भुवनानि जज्ञे'**[१] श्रुतिप्रमाणितं वाग्रूपि शब्दतत्त्वमेव ब्रह्मवर्त्तते। अन्यत् इदं शब्दब्रह्मणः वाक्यपदीयब्रह्मकाण्डस्य प्रधानः प्रतिपाद्यविषयो वर्त्तते। इदं लक्ष्यीकृत्यैव वाक्यपदीयकारेण आचार्यभर्तृहरिणा ग्रन्थस्य प्रारम्भे सर्वप्रथमं वस्तुनिर्देशात्मकं मङ्गलाचरणस्य माध्यमेन मङ्गलस्वरूपं शब्दब्रह्मणः स्मरणं कृतम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[२]

यत् शब्दतत्त्वम् उत्पत्तिविनाशेन रहितमस्ति, यद् विकारहीनम्व्यापकञ्चास्ति तथा यस्मात् सम्पूर्णसंसारस्य समस्तक्रिया-कलापं सञ्चालितं भवति तदेव शब्दतत्वात्मकं अक्षरब्रह्म अर्थरूपे विवर्तितं भवति। स्वयं भर्तृहरिः अस्य मङ्गलाचरणस्य वृत्तौ स्पष्टं लिखति–

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।**

**विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।**[३]

वाक्यपदीयं व्याकरणनिकाये आकरग्रन्थेषु प्रतिष्ठितं वर्त्तते। तद् निर्विवादं सिद्धमस्ति। यथा यत् वाक्यपदीयग्रन्थनाम्ना स्वयं व्यक्तं भवति। वाक्य-पद-प्रतिपादकः ग्रन्थः अथवा वाक्य-प्रतिपादकग्रन्थः। विचारकाणामत्र पर्यन्तं मतमस्ति यत् वाक्यपदीयस्य प्रत्येकं कारिका महाभाष्यस्य किमपि न किमपिअंशमुद्दिश्य लिखितमस्ति। यदपि भवेत्, इदं सर्वमान्यं वर्त्तते यत् वाक्यपदीयं व्याकरणशास्त्रीयः व्यावहारिकदार्शनिकोभयविधसिद्धान्तानां प्रतिपादकः प्रामाणिको ग्रन्थोऽस्ति। अस्मिन्नपि इदं प्रथमं ब्रह्मकाण्डमेव प्रधानरूपेण व्याकरणशास्त्रस्य दार्शनिकमहत्वं प्रतिपादयति।

दार्शनिकमूलतत्वप्रतिपादकः एकमात्रंवेदोऽस्ति अन्यतत्वज्ञातृभिः वेदस्य इदं प्रधानमङ्गं मतम्–

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**

**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।**[४]

**अत्रातीतविपर्यासः केवलामनुपश्यति।**

**छन्दस्यश्छन्दसां योनिमात्माछन्दोमयीं तनुम्॥**[५]

एतावदेव न आचार्यप्रवरभर्तृहरिणा मोक्षस्य द्वारस्वरूपं व्याकरणशास्त्रं साधितम्–

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**

[१] मैत्रायणी उपनिषद् – ६/२२

[२] वाक्यपदीयम् – १/१

[३] वाक्यपदीयम् – १/१ स्वोपज्ञवृत्ति

[४] तदेव – १/११

[५] तदेव – १/१७

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।**[1]

मात्रं मोक्षद्वारमेव न अपितु सरलसोपानं मार्गस्वरूपम् अपि वर्त्तते। अनेन माध्यमेन सरलतापूर्वकं श्रुतिप्रतिपादितं दार्शनिकतत्त्वं अनायासेन प्राप्तुं शक्यते। अनेन मोक्षःसुलभः भवति –

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**

**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।**[2]

एतावता व्याकरणशास्त्रस्य मर्ममाहात्म्यंदर्शितम्। ब्रह्मशब्दस्य निर्माणं निर्मितिरथवा रचना वर्त्तते। (शब्देनोपादानेन हेतुना निर्माणं यस्य तद् शब्दनिर्माणम्) शब्दस्य शक्तयः अस्य कारणं भवन्ति। शब्दस्य शक्तिभिः इदं विवृत्तं भवतिरन्यत् तास्वेव शब्दशक्तिषु विलीनं भवति।

**शब्दतत्त्वम्**

व्याकरणागमे शब्दतत्त्वमेव ब्रह्म अस्ति। ब्रह्मविषयकी या धारणा औपनिषद्वेदान्तिना प्रस्तुताए ता सर्वाः शब्दतत्त्वेन सार्धं समुपलभ्यन्ते, यदा वयं तत् शब्दतत्त्वस्य रूपेण स्वीकुर्मः। परन्तु ब्रह्मणा सार्धंश्लिष्टं किमपि अनुल्बणं शब्दतत्वेन सार्धं न मिलतिए इयं शब्दतत्त्वास्यातिरिक्ता विशेषता वर्त्तते। शब्दतत्त्वस्व विषये न कश्चिद्द्वैतं वर्त्तेतेए नाद्वैतमस्ति नैव विशिष्टाद्वैतम्।

नैदं प्रधानं वर्त्तेतेए न परमाणुः। नैव शिवोन नारायणो। कस्यापि प्रकारस्य अथवा प्रक्रियायाः अत्रावश्यकता नास्ति। सरला एव वर्त्तते - एषा मूर्तप्रकृतिः वर्त्तते। कस्यापि इतस्ततः वार्तायाः या वस्तुनः मूलं गवेषयितुं यदि कुत्रापि भवान् प्रयतते तु भवानन्ते शब्दतत्त्वमेव प्राप्नोति। वस्तुनि कुतः आगच्छन्ति अन्यत् कुत्र गच्छन्तिघ् अस्य सरलं निर्भमम् उत्तरमिदमेवास्ति–

**ब्रह्मेन्द्रं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।**

**विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते॥**[3]

इदं विद्यात्मकमन्यत् अविद्यात्मकमुभयविधंयेन विज्ञपाठकान् अस्याध्ययन-अध्यापनं प्रति रुचिरेवं प्रवृतिः जागृता भवेत्।

---

[1] वाक्यपदीयम् – १/१४

[2] तदेव – १/१६

[3] वाक्यपदीयम् – १/१, स्वोपज्ञवृत्ति